# shrI hariharaputra mAlAmantraH

# श्रीहरिहरपुत्र मालामन्त्रः

## Document Information

Text title : hariharaputramAlAmantra

File name : hariharaputramaalaamantra.itx

Category : mAlAmantra, deities_misc, ayyappa

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2021

*sanskritdocuments.org*

shrI hariharaputra mAlAmantraH

# श्रीहरिहरपुत्र मालामन्त्रः

ॐ नमो भगवते रुद्रकुमाराय हरिहरपुत्राय आर्याय
हाटकाचलकोटिमधुरसारमहाहृदयाय हेमजाम्बूनदनवरत्न-
सिंहासनाधिष्ठिताय वैडूर्यमणिमण्डपक्रीडागृहाय
लाक्षाकुङ्कुमजपाविद्युत्तुल्यप्रभाय प्रसन्नवदनाय
उन्मत्तचूडाकलितलोलमाल्यवृतवक्षःस्तम्भमणिपादुकामण्डपाय
प्रस्फुंरन् अनिमण्डितोपकर्णाय पूर्णालङ्कारबन्धुरदन्तिनिरीक्षिताय
कदाचित् कोटिवाद्यातिशायिनिरन्तरजयशब्दमुखरनारदादि देवर्षि-
शक्रप्रमुखलोकपालतिलकोत्तमाय दिव्यास्त्रपरिसेविताय गोरोचनागरु-
कर्पूरश्रीगन्धप्रलेपिताय विश्वावसुप्रधानगन्धर्वसेविताय
पूर्णापुष्कलोभयपार्श्वसेविताय सत्यसन्धाय महाशास्त्रे नमः ॥

मां रक्ष रक्ष, भक्तजनान् रक्ष रक्ष,मम शत्रून् शीघ्रं मारय मारय,
भूतप्रेतपिशाचब्रह्मराक्षसयक्षगन्धर्वपरप्रेषिताभिचारकृत्यारोग-
प्रतिबन्धकसमस्तदुष्ट्ग्रहान् मोचय मोचय, आयुर्वित्तं देहि मे स्वाहा ॥

सकल देवता आकर्षयाकर्षय, उच्चाटयोच्चाटय, स्तम्भयस्तम्भय,
मम शत्रून् मारय मारय, सर्वजनं मे वशमानयवशमानय,
सम्मोहय सम्मोहय सदाऽऽरोग्यं कुरु कुरु स्वाहा ॥ १
ॐ घ्रूं असिताङ्गाय महावीरपराक्रमाय गदाधराय धूम्रनेत्राय
दंष्ट्राकराळाय मालाधराय नीलाम्बराय सर्वापद्घ्नेसर्वभयापघ्ने
शिवपुत्राय कृद्धाय कृपाकराय स्वाहा ॥ २

इति श्रीहरिहरपुत्र मालामन्त्रः सम्पूर्णः ।

Encoded by Antaratma antaratma at Safe-mail.net
Proofread by Antaratma, PSA Easwaran

*shrI hariharaputra mAlAmantraH*

pdf was typeset on July 10, 2021

Please send corrections to *sanskrit@cheerful.com*